CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥ श्रीगणेशाय नमः ॥ अथाग्निवैकृतशांतिः । अमुकगोत्रस्य अमु
कशर्मणः मम गृहस्यैकदेशे ज्वालितो योदाहस्तत्सूचितसकला
रिष्टनिरसनपूर्वकपुत्रपौत्रकलत्रैश्वर्याद्यभिवृद्धिद्वारा श्री
अग्निरूपीपरमेश्वरप्रीत्यर्थं सनवग्रहमखां अग्निवैकृतशां
तिं करिष्ये । तदंगगणपतिपूजनादि आचार्यवरणांतं कृत्वा । ततः
आचार्यः यदत्रेत्यादि रक्षास्त्र । ततः स्थंडिलादीशान्यां कलश
स्थापनपूर्वकं पूर्णपात्रनिधानांतं कृत्वा तदुपरि अग्निं दूतं वृणी
महे स्रुच्यं तु । अनेन मंत्रेण स्रुवर्ण अग्निप्रतिमां स्थापयेत् । क
लशस्य मं॰ देवदानवसं॰ सर्वदा । ततः अग्निस्थापनादि अन्वाधानं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

अग्निं प्रतिष्ठाप्य अष्टोत्तरशतसंख्याकाभिः समित्सर्पिर्घृताहुति
भिः। शेषेतास्विष्टकृदादि होमशेषं समाप्य। दद्यात्सुवर्णं गां
वस्त्राणि भूवं च। आज्यावलोकनपात्रदानं ततः शं न इन्द्राग्नी इति
ऋचेन दध्यग्रहं प्रोक्ष्य कर्मशेषं समाप्य। इति शांतिकमला
करोक्त अग्निवैकृतगृहदग्धशांतिः। सं. १८५१ मिती का. शु
२ रवौ इदं पुस्तकं कुटेदूरूपनामकविनायकभ [redacted] दस्य।